# Stavakalpadrumah

# स्तवकल्पद्रुमः

## Document Information

Text title : Stavakalpadrumah

File name : stavakalpadrumaH.itx

Category : devii, devI, nadI

Location : doc_devii

Transliterated by : Anil Kumar Pandey anil.kumar17pandey at gmail.com

Proofread by : Anil Kumar Pandey anil.kumar17pandey at gmail.com

Description/comments : Ganga Jnana Mahodadhi compiled by Acharya Ramapada Chakravarty

Latest update : December 7, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 7, 2019

*sanskritdocuments.org*

# स्तवकल्पद्रुमः

श्रीगणेशाय नमः ।

श्रीगङ्गा-प्रणामः

नवद्वीपारामप्रकरकुसुमामोदवलितां
  स्फुरद्रत्नश्रेणीचित-तट-सुतीर्थावलियुताम् ।
हरेगौररराङ्गस्यातुल-चरण-रेणूक्षित-तनुं
  समुद्यत्-प्रेमोर्मीतुमुलहरिसङ्कीर्तन-रसैः ॥ १॥

प्रभुक्रीडापात्रीममृतरसगात्रीमृषितटां
  शिवब्रह्मेन्द्रादीडित-महित-माहात्म्यमुखराम् ।
लसत्-किञ्जल्काम्भोजनि-मधुप-गर्भोरुकरुणा
  महं वन्दे गङ्गामघ-निकर-भङ्गां जलकणाम् ॥ २॥

सद्यः पातकसंहन्त्री सद्यो दुःखविनाशिनी ।
सुखदा मोक्षदा गङ्गा गङ्गैव परमा गतिः ॥ ३॥

श्रीगङ्गास्नानमन्त्रः

विष्णुपाद-प्रसूताऽसि वैष्णवी विष्णुदेवता ।
पाहि नस्त्वेनसस्तस्मादाजन्ममरणान्तिकात् ॥ १॥

श्रीगङ्गास्तवः

गङ्गे समस्तजगदम्ब चलत्तरङ्गेऽ
  नङ्गारिचारुतरमस्तकपुष्पमाले ।
कंसारिचारुचरणद्वयरेणुहर्षि
  भक्त्या नमामि दुरितक्षयकारिणि त्वाम् ॥ १॥

मातः समस्तसुखदे प्रवरे नदीनां
  व्यासादिविप्रचयगीतगुणे गुणाढ्ये ।
संसारभैरवमहार्णवमध्यनौके
  वन्दे तवाङ्घ्रियुगलं दुरितापहारि ॥ २॥

यस्यास्तवाम्बु कणिकामपि जन्हुकन्ये !
    सौदासनामनृपतिर्द्विजकोटिहन्ता ।
संप्राप्य मुक्तिमगमत् त्रिदशैरलभ्यां
    तां त्वां नमामि शिरसा वरदे ! प्रसीद ॥ ३॥

नारायणाच्युतजनार्दनकृष्णराम
    गङ्गादिनाम वदतो मम देवि ! मातः ! ।
संसारपातकनिवारिणि देहपात
    स्त्वद्वारिणीह भवतु त्वदनुग्रहेण ॥ ४॥

किंवा तपोभिरखिलेश्वरि ! किं जपैर्वा
    दानैश्च किं तुरगमेधमुखैमखैर्वा ।
त्वन्नीरशीकरमवाप्य सुरैरलभ्यां
    मुक्तिं व्रजन्ति मनुजा अपि पापिनोऽपि ॥ ५॥

स्वाहा त्वमेव परमेश्वरि ! या स्वधा त्वं
    गीर्वाणवृन्दपितृलोकसुतृप्तिहेतुः ।
सत्त्वं रजस्तम इति त्रिगुणस्वरूपा
    सृष्टिस्थितिप्रलयकारिणि नौमि तां त्वाम् ॥ ६॥

धत्ते ललाटफलके तव सैकतं यः
    पुण्ड्रं च देवि तव तीरमृदा सदैव ।
त्वन्नाम सर्वरसधाम वदेच्च भक्त्या
    तत्पादरेणुरखिलोऽस्तु ममैव मूर्धिर्न  ॥ ७॥

इति स्तवकल्पद्रुमः श्रीगङ्गा-प्रणामः सम्पूर्णः ।

Encoded and proofread by Anil Kumar Pandey anil.kumar17pandey at gmail.com

*Stavakalpadrumah*

pdf was typeset on December 7, 2019

Please send corrections to *sanskrit@cheerful.com*